श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षष्टितमः सर्गः ॥

## श्रीरामस्य राजसभायां यमुनातीरवासिनामृषीणां शुभागमनं श्रीरामेण तान् सत्कृत्य तेषामभीष्टं पूरयितुं प्रतिज्ञापनमृषिभिस्तस्य प्रशंसनं च

तयोः संवदतोरेवं रामलक्ष्मणयोस्तदा।
वासन्तिकी निशा प्राप्ता न शीता न च घर्मदा॥ **7.60.1** ॥

ततः प्रभाते विमले कृतपूर्वाह्निकक्रियः।
अभिचक्राम काकुत्स्थो दर्शनं पौरकार्यवित्॥ **7.60.2** ॥

ततः सुमन्त्रस्त्वागम्य राघवं वाक्यमब्रवीत्।
एते प्रतिहता राजन् द्वारि तिष्ठन्ति तापसाः॥ **7.60.3** ॥

भार्गवं च्यवनं चैव पुरस्कृत्य महर्षयः।
दर्शनं ते महाराज चोदयन्ति कृतत्वराः॥ **7.60.4** ॥

प्रीयमाणा नरव्याघ्र यमुनातीरवासिनः।
तस्य तद् वचनं श्रुत्वा रामः प्रोवाच धर्मवित्॥ **7.60.5** ॥

प्रवेश्यन्तां महाभागा भार्गवप्रमुखा द्विजाः।
राज्ञस्त्वाज्ञां पुरस्कृत्य द्वाःस्थो मूर्ध्ना कृताञ्जलिः॥ **7.60.6** ॥

प्रवेशयामास तदा तापसान् सुदुरासदान्।
शतं समधिकं तत्र दीप्यमानं स्वतेजसा॥ **7.60.7** ॥

प्रविष्टं राजभवनं तापसानां महात्मनाम्।
ते द्विजाः पूर्णकलशैः सर्वतीर्थाम्बुसत्कृतैः॥ **7.60.8** ॥

गृहीत्वा फलमूलं च रामस्याभ्याहरन् बहु।
प्रतिगृह्य तु तत् सर्वं रामः प्रीतिपुरस्कृतः॥ **7.60.9** ॥

तीर्थोदकानि सर्वाणि फलानि विविधानि च।
उवाच च महाबाहुः सर्वानेव महामुनीन्॥ **7.60.10** ॥

इमान्यासनमुख्यानि यथार्हमुपविश्यताम्।
रामस्य भाषितं श्रुत्वा सर्व एव महर्षयः॥ **7.60.11** ॥

बृसीषु रुचिराख्यासु निषेदुः काञ्चनीषु ते।
उपविष्टानृषीस्तत्र दृष्ट्वा परपुरञ्जयः।
प्रयतः प्राञ्जलिर्भूत्वा राघवो वाक्यमब्रवीत्॥ **7.60.12** ॥

किमागमनकार्यं वः किं करोमि समाहितः।
आज्ञाप्योऽहं महर्षीणां सर्वकामकरः सुखम्॥ **7.60.13** ॥

इदं राज्यं च सकलं जीवितं च हृदि स्थितम्।
सर्वमेतद् द्विजार्थं मे सत्यमेतद् ब्रवीमि वः॥ **7.60.14** ॥

तस्य तद् वचनं श्रुत्वा साधुकारो महानभूत्।
ऋषीणामुग्रतपसां यमुनातीरवासिनाम्॥ **7.60.15** ॥

ऊचुश्चैव महात्मानो हर्षेण महता वृताः।
उपपन्नं नरश्रेष्ठ तवैव भुवि नान्यतः॥ **7.60.16** ॥

बहवः पार्थिवा राजन्नतिक्रान्ता महाबलाः।
कार्यस्य गौरवं मत्वा प्रतिज्ञां नाभ्यरोचयन्॥ **7.60.17** ॥

त्वया पुनर्ब्राह्मणगौरवादियं
    कृता प्रतिज्ञा ह्यनवेक्ष्य कारणम्।
ततश्च कर्ता ह्यसि नात्र संशयो
    महाभयात् त्रातुमृषींस्त्वमर्हसि ॥ **7.60.18** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षष्टितमः सर्गः ॥